श्रीमते रामानुजाय नमः

**श्री भगवद्रामानुजमुनिभिरनुग्रहीतम्**

# ॥ श्रीरङ्ग गद्यम्॥

चिदचित्परतत्वानां * तत्वयाथात्म्यवेदिने।
रामानुजाय मुनये * नमो मम गरीयसे॥

* स्वाधीन त्रिविध चेतनाचेतन स्वरूप स्थिति प्रवृत्ति भेदं *
क्लेश कर्माद्यशेष दोषासंस्पृष्टं * स्वाभाविकानव्धिकातिशय
ज्ञान बलैश्वर्य * वीर्य शक्ति तेजस्सौशील्य वात्सल्य मार्दवार्जव *
सौहार्द साम्य कारुण्य माधुर्य गाम्भीर्यौदार्य * चातुर्य स्थैर्य
धैर्य शौर्य पराक्रम * सत्यकाम सत्यसङ्कल्प * कृतित्व
कृतज्ञताद्यसङ्ख्येय कल्याण गुणगणौघ महार्णवं *
परब्रह्मभूतं * पुरुषोत्तमं * श्रीरङ्गशायिनं * अस्मत्स्वामिनं *
प्रबुद्ध नित्य नियाम्य नित्य दास्यैकरसात्मस्वभावोऽहं *
तदेकानुभवः * तदेकप्रियः * परिपूर्णम् भगवन्तं *
विशदतमानुभवेन निरन्तरमनुभूय * तदनुभव
जनित अनवधिकातिशय प्रीतिकारित * अशेषावस्थोचित
अशेषशेषतैकरतिरूप * नित्य किङ्करो भवानि॥ १

स्वात्म नित्य नियाम्य नित्यदास्यैकरसात्म स्वभावानुसन्धान पूर्वक *
भगवदनवधिकातिशय * स्वाम्याद्यखिल गुणगणानुभवजनित *
अनवधिकातिशय प्रीतिकारित * अशेषावस्थोचित *
अशेषशेषतैकरतिरूप * नित्य कैङ्कर्य प्राप्त्युपाय भूतभक्ति *
तदुपाय सम्यग्ज्ञान * तदुपाय समीचीनक्रिया * तदनुगुण
सात्विकतास्तिक्यादि * समस्त आत्म गुण विहीनः * दुरुत्तरानन्त *
तद्विपर्यय ज्ञानक्रियानुगुण * अनादि पाप वासना महार्णवान्तर्निमग्नः *

तिलतैलवत् * दारुवन्हिवत् * दुर्विवेच त्रिगुणक्षणक्षरण
स्भाव * अचेतन प्रकृति व्याप्तिरूप * दुरत्यय भगवन्माया
तिरोहित स्वप्रकाशः * अनाद्यविद्या सञ्चित * अनन्त अशक्य
विस्रंसन कर्मपाश प्रग्रथितः * अनागत अनन्त काल
समीक्षयाऽपि * अदृष्ट सन्तारोपायः * निखिल जन्तु जात शरण्य! *
श्रीमन्! * नारायण! तव चरणारविन्दयुगळं * शरणमहं
प्रपद्ये॥ २

एवमवस्थितस्यापि * अर्थित्वमात्रेण परमकारुणिको भगवान् *
स्वानुभव प्रीत्योपनीत ऐकान्तिक अत्यन्तिक * नित्य
कैङ्कर्यैक्रतिरूप * नित्य दास्यं दास्यतीति * विश्वासपूर्वकं *
भगवन्तं नित्य किङ्करतां प्रार्थये॥ ३

तवानुभूति संभूत प्रीतिकारित दासताम्।
देहि मे कृपया नाथ! * न जाने गतिमन्यथा॥ ४

सर्वावस्थोचित अशेषशेषतैकरतिस्तव।
भवेयं पुण्दरीकाक्ष! * त्वमेवैवं कुरुष्व माम्॥ ५

एवम्भूत तत्त्वयाथात्म्यावबोध * तदिच्छारहितस्यापि *
एतदुच्चारण मात्रावलम्बनेन * उच्यमानार्थ परमार्थ
निष्टं * मे मनः * त्वमेव अध्यैव कारय॥ ६

अपार करुणाम्बुधे! * अनालोचित विशेष * अशेष लोक शरण्य!
प्रणतार्तिहर! * आश्रित वात्सल्यैक महोदधे! अनवरत विदित
निखिल भूत जात * याथात्म्य! * सत्यकाम! * सत्य सङ्कल्प! *
आपत्सख! * काकुत्स्थ! * श्रीमन्! * नारायण! * पुरुषोत्तम! *

* श्रीरङ्गनाथ! * मम नाथ! नमोऽस्तु ते॥ ७

**॥ इति श्रीरङ्ग गद्यं समाप्तम्॥**